# दशमः अन्ताराष्ट्रिययोगदिवसः

***निरामयत्त्वसम्पादनाय योगमार्गः आश्रयणीय एव***

- आचार्यः श्रीनिवासः वरखेडी

**२१/०६/२४**



केन्द्रीयसंस्कृतविश्वविद्यालयेन अद्य देहल्यां (मुख्यालये) सर्वत्र परिसरेषु च दशमः अन्ताराष्ट्रिययोगदिवसः सवैभवं समाचरितः। वेदव्यासपरिसरे विशेषरूपेण आयोजिते विशिष्टे च कार्यक्रमे (स्वयमपि योगाभ्यासं विधाय) कुलपतयः सर्वान् उदबोधयन्। तद्यथा -

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥**

(सभी सुखी होवें, सभी रोगमुक्त रहें, सभी मंगलमय के साक्षी बनें

और किसी को भी दुःख का भागी न बनना पड़े।)



इत्येषः माङ्गलिकश्लोकः भारतीयानां मुखेभ्यः सर्वदा निस्सरन्ति। तस्य विश्लेषणमपि अस्माभिः करणीयम्। के सुखिनः भवन्ति इत्युक्ते धर्मावलम्बिनः सुखिनः भवन्ति इति वक्तुं शक्यते। यत्र धर्मः तत्रैव सुखम्। सुखस्य मूलं धर्मः इति शास्त्रम् । अतः धर्मेण सुखं विन्दामः। कः निरामयः भवति इत्युक्ते योगी इत्युत्तरम्। निरामयस्य मूलं योगः। अतः योगाभ्यासं कारं कारं निरोगिणः भवेम। पुनः भद्राणि कः पश्यति इत्युक्ते यः निर्मलमनस्कः सः इति समाधानम्। संस्कृतेन अस्माकं मनांसि संस्कृतानि भवन्ति इत्यतः भद्रस्य मूलं संस्कृतम्। कः दुःखभाक् न भवति इत्युक्ते यः दुःखेन निवृत्तः वर्तते सः इति भावः। दुःखं बन्धस्य क्लेशस्य वा कारणं भवति न तु मोक्षस्य न वा परमपुरुषार्थस्य। अतः न कोऽपि दुःखभाक् भवेत्। एवं विशिष्टार्थयुक्तः एषः मङ्गलश्लोकः सर्वत्र उच्चार्यते। सः सार्थकः इत्यतः अत्र उदाहृतः। नानापरिसरेभ्यः समागतेभ्यः योगपटुभ्यः परिसराणां सनिदेशकगुरुशिष्येभ्यः मुख्यातिथये मुकुल कानिटकर महोदयाय पुनः अन्येभ्यः सहयोगिभ्यश्च योगदिवसस्य अशेषशुभकामनाः व्याहरामि ' इति।



मुख्यातिथिः मुकुल कानिटकरमहोदयः अवदत् यत्- 'भारतं पुनरपि विश्वगुरुत्वेन प्रतिष्ठापयितुम् अन्ताराष्ट्रिययोगदिवसः एकं सोपानम् इति अहं तर्कयामि। किञ्च योगाभ्यासः भारतीयानां नित्यकर्म अस्ति। अद्यापि भारतीयाः अष्टादशप्रकारकान् सूर्यनमस्कारान् कुर्वन्ति।

नानाविधानि आसनानि योगिभिः कल्पितानि सन्ति। योगः नाम सम्बन्धः अस्ति। परन्तु अद्यत्वे वियोगः एव अधिकः जातः। परिवारेण समाजेन विश्वेन किं बहुना प्रकृत्या सहापि मानवस्य सम्बन्धः क्षीयमाणः वर्तते। अतः योगः भवेत् सर्वत्रापि। वियोगात् योगं प्रति गच्छामः। सर्वेषां मे शुभाशयाः' इति।

वेदव्यासपरिसरे एव योगमहोत्सवाङ्गतया शोभायात्रा, ओलम्पियाड् उद्घाटनकार्यक्रमः, सभाकार्यक्रमः, योगप्रदर्शनी इत्येवमादयः विशिष्टकार्यक्रमाः अपि आयोजिताः।

परिसरनिदेशकपदस्था प्रो. सत्यम् कुमारी महोदया छात्रकल्याणाधिष्ठाता प्रो. मदनमोहनझावर्यः अन्ये बहवो हि अधिकारिणः परिसरपरिवारसदस्याश्च विभिन्नान् कार्यक्रमान् प्रत्यक्षम् आयोज्य सर्वेषां ध्यानाकर्षणाय सफलाः अभवन्।




विश्वविद्यालयस्य मुख्यालये अन्ताराष्ट्रिययोगपुटः श्रीमान् सञ्जीवकुमारः अद्य सर्वेभ्यः अधिकारिभ्यः शिक्षकेभ्यः कर्मचारिभ्यश्च योगरहस्यानि उपादिशत्। चीनदेशे योगाभ्यासं कथं कुर्वन्ति इत्यपि उदाहरत्।विविधासनानि कथं कर्तव्यानि इति प्रशिक्षणमपि मुख्यालयप्राङ्गणे एव प्रायच्छत्। युवकुलसचिवः प्रो. रा.गा. मुरलीकृष्णमहोदयः प्रकाशननिदेशकः प्रो. काशीनाथ न्यौपानेवर्यः आयोजकौ प्रो. नारायणसिंह डा. विजयकुमार दाधीचवर्यौ पुनः अन्ये सर्वे अधिकारिणः शिक्षकाः च योगाभ्यासं कृत्वा सन्तृप्ताः अभवन्। प्रकाशननिदेशकाः न्यौपानेवर्याः शीर्षासनं प्रदर्श्य सर्वान् प्रेरितवन्तः अपि।








वार्तासारसङ्ग्रहः

डा. गणेश ति. पण्डितः